# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## तुरीया परीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 04-02-2024 | अङ्काः - 100

पूर्वाह्ने – 10:00 वादनतः 1:00 वादनपर्यन्तम् | समयः – घण्टात्रयम्

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1 पञ्चानाम् एकवाक्येन उत्तरं लिखत । 5**

१. शृङ्गगिरिक्षेत्रे कः अद्यापि तपश्चरन्नास्ते इति प्रशस्तिः चकास्ति ?

२. सर्वस्य धातारं ब्रह्माणं के उपतस्थिरे ?

३. वरतन्तुः गुरुदक्षिणारूपेण कियत् वित्तं कौत्सम् अपृच्छत् ?

४. लक्ष्मणसूरिमहोदयस्य पितुः नाम किम् ?

५. सहस्रानीकः कस्य पुत्रः ?

६. भैमी का ?

७. शिवगुरुः कं ययाचे ?

८. पितुर्गृहे वर्तमाना कुन्ती कं महर्षिं पर्यचरत् ?

**2 पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत । 10**

१. मृगावतीं तुण्डेन आदाय उड्डीनः गरुडः किम् अकरोत् ?

२. नलेन गृहीतः हंसः तं किम् अब्रवीत् ?

३. साकेतनिवासिनां रघुः कौत्सश्च कथम् अभिनन्द्यसत्त्वौ अभूताम् ?

४. पाठप्रारम्भाय विलम्बमानं गुरुं पद्मपादः किम् अभ्यधात् ?

५. पुत्रजननवार्तां श्रुत्वा शिवगुरुः किम् अकरोत् ?

६. द्रुपदं दृष्ट्वा द्रोणः किमाह ?

७. भगवतः सर्वात्मत्वं कथम् ?

**3 द्वयोः विस्तरेण (सप्ताष्टैर्वाक्यैः) उत्तरं लिखत ।** **8**

१. वाल्मीकिकृतं चन्द्रोदयवर्णनं विशदयत ।

२. भीमकृतबकवधस्य वृत्तान्तं वर्णयत ।

३. अन्तःपुरं प्रविष्टस्य नलस्य दम्यन्त्याः मध्ये च सञ्जातसंवादं विवृणुत ।

४. हस्तिनापुरम् आगतान् पाण्डवान् दृष्ट्वा नागराः किम् अतर्कयन् ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. आशास्यमन्यत् पुनरुक्तभूतम् ।

२. मयि घोषवती नाम वीणास्ति ।

३. स्त्रीणां निसर्गसिद्धा हि निपुणता ।

४. वर्धिष्णुर्भुवनगुरुर्यतो विवेश ।

५. सज्जा भव कुलिशप्रहारं कुसुमाञ्जलिना धर्तुम् ।

**5 द्वयोः भावं विशदयत ।** **8**

१. श्रीमान् मुदा शुभतमेऽहनि चारुनाम चक्रे पिता सपदि शङ्कर इत्यमुष्य ।
अन्वर्थनाम भुवि शङ्करणेन यद्वा शं सर्वदा करवशं ध्रुवमस्य भावि ॥

२. अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु ।
चिन्तितोपस्थितांस्तावच्छाधि नः करवाम किम् ॥

३. तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये ।
स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥

४. यः प्रीणयेत् सुचरितैः पितरं स पुत्रो यद्भर्तुरेव हितमच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यत् एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

**6 श्लोकमेकं पूर्णं लिखत ।** **4**

१. एते .................. जानीमहे ॥

२. यद्धात्रा .................. जलम् ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत ।** **4**

१. लक्ष्मणसूरिः २. वाल्मीकिः

**8 एकस्य लघुटिप्पणीं लिखत ।** **4**

१. शृङ्गेरीक्षेत्रम् २. पाण्डुः

**9 चत्वारि पदानि वाक्ये योजयत ।** **4**

१. भुवनगुरुः २. वाग्भिः ३. ददामि
४. वीक्ष्य ५. राजन् ६. क्षत्रा

**10 चतुर्णां रूपाणि विवेचयत ।** 4

१. हैडिम्बेयः २. कवची ३. असकृत्
४. अनुगृहीतवान् ५. उवाच ६. अवादीत्

**11 चतुर्णां पर्यायपदानि लिखत ।** **4**

१. विविक्ते २. तमिस्रा ३. अञ्जसा
४. तनयः ५. अरुजम् ६. प्रतीक्ष्येषु

**12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **4**

१. उत्तमगुणाः (जनाः) २. यथाकालम् ३. पुष्करस्था
४. एनोनिवृत्तेन्द्रियवृत्तिः ५. गुरुशनिभूमिसूनुसूर्याः ६. गिरिराजः

**13 चतुर्णां सन्धिं विभज्य नाम लिखत ।** **4**

१. प्रासादमाससाद २. कालेऽस्मिन् ३. क्लेशितापि
४ कस्यचिद्वटवृक्षस्य ५. स्त्रीभिस्सह ६. गच्छंश्च

**14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** **6**

१. चक्रे २. विराजते ३. वर्तेथाः ४. अवदत्

**15 द्वयोः व्याकरणविशेषं लिखत ।** **4**

१. पाराशर्यः २. नरकात् त्रायते ३. स्वस्त्यस्तु ते ४. अर्थ्याः

**16 समासमेकं सलक्षणं विशदयत ।** **4**

१. तत्पुरुषसमासः २. बहुव्रीहिसमासः

**17 चतुर्थं पदं लिखत ।** **4**

१. लक्ष्मणशास्त्री – शङ्करावतारः :: लक्ष्मणसूरिः – ________

२. भीमः – दमयन्ती :: कृतवर्मा – ________

३. शन्तनुः – हस्तिनापुरी :: रघुः – ________

४. रामकृष्णौ – रामश्च कृष्णश्च :: त्रिभुवनम् – ________

**18 इतरवचनानि लिखत ।** **4**

१. दुर्वासाः ______ ______ ।

२. ______ रोचेताम् ______ ।

३. गुणवान् ______ ______ ।

४. ______ ______ पेतुः ।

**19 रिक्तस्थानानि पूरयत ।** **4**

१. भो राजन्! __________ मां वधीः ।

२. भवन्ति नम्राः __________ फलोद्गमैः ।

३. क्लेशापहाय __________ पार्थसारथये नमः ।

४. तस्मात् प्रयतस्व ________ गृहिणीपदप्राप्तये ।

**20 प्रयोगपरिवर्तनं कुरुत ।** **2**

१. राजन्! क्षणं स्थीयताम् ।

२. सद्भावान् कलयति शङ्करैकभावम् ।

------------------------